# ॥ ऋणमोचकमङ्गलस्तोत्रम् ॥

# Ṛṇamocaka Maṅgala Stotram

मङ्गलो भूमिपुत्रश्च ऋणहर्ता धनप्रदः ।

**maṅgalo bhūmiputraśca ṛṇahartā dhanapradaḥ |**

स्थिरासनो महाकायः सर्वकर्मावरोधकः ॥ १ ॥

**sthirāsano mahākāyaḥ sarvakarmāvarodhakaḥ || 1||**

लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।

**lohito lohitākṣaśca sāmagānāṁ kṛpākaraḥ |**

धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः ॥ २ ॥

**dharātmajaḥ kujo bhaumo bhūtido bhūminandanaḥ || 2||**

अङ्गारको यमश्चैव सर्वरोगापहारकः ।

**aṅgārako yamaścaiva sarvarogāpahārakaḥ |**

वृष्टेः कर्ताऽपहर्ता च सर्वकामफलप्रदः ॥ ३ ॥

**vṛṣṭeḥ kartā'pahartā ca sarvakāmaphalapradaḥ || 3||**

एतानि कुजनामानि नित्यं यः श्रद्धया पठेत् ।

**etāni kujanāmāni nityaṁ yaḥ śraddhayā paṭhet |**

ऋणं न जायते तस्य धनं शीघ्रमवाप्नुयात् ॥ ४ ॥

**ṛṇaṁ na jāyate tasya dhanaṁ śīghramavāpnuyāt || 4||**

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम् ।

**dharaṇīgarbhasambhūtaṁ vidyutkāntisamaprabham |**

कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥ ५ ॥

**kumāraṁ śaktihastaṁ taṁ maṅgalaṁ praṇamāmyaham || 5||**

स्तोत्रमङ्गारकस्यैतत् पठनीयं सदा नृभिः ।

**stotramaṅgārakasyaitat paṭhanīyaṁ sadā nṛbhiḥ |**

न तेषां भौमजा पीडा स्वल्पापि भवति क्वचित् ॥ ६ ॥

**na teṣāṁ bhaumajā pīḍā svalpāpi bhavati kvacit || 6||**

अङ्गारक महाभाग भगवन् भक्तवत्सल ।

**aṅgāraka mahābhāga bhagavan bhaktavatsala |**

त्वां नमामि ममाशेषमृणमाशु विनाशय ॥ ७ ॥

**tvāṁ namāmi mamāśeṣamṛṇamāśu vināśaya || 7||**

ऋणरोगादिदारिद्र्यं ये चान्ये ह्यपमृत्यवः ।

**ṛṇarogādidāridryaṁ ye cānye hyapamṛtyavaḥ |**

भयक्लेशमनस्तापा नश्यंतु मम सर्वदा ॥ ८ ॥

**bhayakleśamanastāpā naśyantu mama sarvadā || 8||**

अतिवक्र दुराराध्य भोगमुक्तजितात्मनः ।

**ativakra durārādhya bhogamuktajitātmanaḥ |**

तुष्टो ददासि साम्राज्यं रुष्टो हरसि तत्क्षणात् ॥ ९ ॥

**tuṣṭo dadāsi sāmrājyaṁ ruṣṭo harasi tatkṣaṇāt || 9||**

विरिञ्चिशक्रविष्णूनां मनुष्याणां तु का कथा ।
viriñciśakraviṣṇūnāṁ manuṣyāṇāṁ tu kā kathā |
तेन त्वं सर्वसत्त्वेन ग्रहराजो महाबलः ॥ १० ॥
tena tvaṁ sarvasattvena graharājo mahābalaḥ || 10||

पुत्रान् देहि धनं देहि त्वामस्मि शरणं गतः ।
putrān dehi dhanaṁ dehi tvāmasmi śaraṇaṁ gataḥ |
ऋणदारिद्र्यदुःखेन शत्रूणां च भयात्ततः ॥ ११ ॥
ṛṇadāridryaduḥkhena śatrūṇāṁ ca bhayāttataḥ || 11||

एभिर्द्वादशभिः श्लोकैर्यः स्तौति च धरासुतम् ।
ebhirdvādaśabhiḥ ślokairyaḥ stauti ca dharāsutam |
महतीं श्रियमाप्नोति ह्यपरो धनदो युवा ॥ १२ ॥
mahatīṁ śriyamāpnoti hyaparo dhanado yuvā || 12||

॥ इति श्रीस्कन्दपुराणे भार्गवप्रोक्तं
|| iti śrīskandapurāṇe bhārgavaproktaṁ
ऋणमोचकमङ्गलस्तोत्रं संपूर्णम् ॥
ṛṇamocakamaṅgalastotraṁ sampūrṇam ||